# Bhajana Ratnavali

# દ્વિપઞ્ચાશદ્દ્વારાચાર્યા વિરચિતા ભજનરત્નાવલી

## Document Information

Text title : Bhajana Ratnavali

File name : bhajanaratnAvalI.itx

Category : raama, rAmAnanda

Location : doc_raama

Author : dvipanchAshadvArAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# દ્વિપઞ્ચાશદ્દ્વારાચાર્યા વિરચિતા ભજનરત્નાવલી

યોગાનન્તસુખાસ્તથાનહરિર્ભાવસ્તથાગાલવો,
હ્યાનન્દેતિપદાન્તકાઃ સુરસુરશ્શિષ્યાશ્ચસમ્રાભવન્ ।
પીપાસેનધનારમાશ્ચ કબિરઃપદ્માવતી ચાપરે,
સાર્દ્ધૈર્દ્વાદશશિષ્યકૈસ્તુગુરવઃ કુર્વન્તુનો મઙ્ગલમ્ ॥ ૧॥

રામાનન્દો નિમ્બાદિત્યોવિષ્ણુસ્વામીશ્રીમાધવઃ ।
ચત્વારોભગવદ્ભક્તાજગતીધર્મસ્થાપકાઃ ॥ ૨॥

એતેષામનુયાયિનોદ્વિપઞ્ચાશદ્દ્વિજજ્ઞિરે ।
અનન્તશ્ચા લખરામૌ સુખાનન્દોનરહરિઃ ॥ ૩॥

કીલાગ્રૌસુસુરાન્દો ભાવાનન્દસ્તથૈવચ ।
દેવકરાનુભાનન્દૌપીપાવિરમથમ્મણાઃ ॥ ૪॥

નાભાટીલોતથાખોજીકૂબાલાલતુરઙ્ગિણૌ ।
મલૂકશ્ચેતનસ્વામી યોગા નન્દભડઙ્ગિનૌમ્ ॥ ૫॥

શ્રીભગવન્નારાયણૌ રામરઙ્ગીચતુર્ભુજઃ ।
પૂર્ણવિરાઠી હનુમાન્ રામરાવલ એવચ ॥ ૬॥

કબીરદેવમુરારી હુઁદુરામસ્તથૈવચ ।
માધવોજ્ઞાનિનામાશ્ચ શ્રીતનતુલસી તથા ॥ ૭॥

રાઘોચેતનકાલુશ્ચ રામરમણિરેવચ ।
રામાનન્દાનુયાયિનાન્દ્વારાઃ સપ્તત્રિંશન્મતાઃ ॥ ૮॥

નાગાખ્યશ્શોભુરામશ્ચ વનખણ્ડીઘમણ્ડીચ ।
પરશુરામશ્ચગોવિન્દસ્ત્યાગી કર્મચન્દસ્તથા ।
આત્મારામાશ્ચ નવમોનિમ્બાર્કસ્યાનુયાયિનામ્ ॥ ૯॥

નિત્યાનન્દઃ શ્યામાનન્દઃ શ્રીરાધાબલ્લભસ્તથા ॥ ૧૦॥

શ્રીમાધ્વસમ્પ્રદાયિનાન્ત્રયોદ્વારાઃ સતામ્મતાઃ ॥ ૧૧॥

સુભક્તોનામદેવોવૈ ગોકુલો વિટ્ઠલસ્તથા ।
વિષ્ણુસ્વામ્યનુયાયિના ત્રયોદ્વારાઃ સતામ્મતાઃ ॥ ૧૨॥

રામનારાયણેનેમેન્દ્વારા અયોધ્યાવાસિના ।
ચતુર્ણાંસમ્પ્રદાયિનાં વર્ણિતાહિ વિભાગશઃ ॥ ૧૩॥

અથસપ્ત, અખાડા-
અખણ્ડસંજ્ઞાસઙ્કેતઃ કૃતોધર્મવિવર્દ્ધયે ।
લાનન્દપ્રભૃતિભિઃ સમ્પ્રદાયાનુસારિભિઃ ॥ ૧॥

નાહમાદિખણ્ડોયત્ર સાખણ્ડૌહાહૃતઃઃ ।
ચતુર્ણાંસમ્પ્રદાયિનામખણ્ડા ઃ સપ્તવૈમતાઃ ॥ ૨॥

તત્તદન્તર સંજ્ઞાનામર્થશ્ચૈવ યથાશ્રુતઃ ।
વર્ણયામિ વૈષ્ણવાનાં પાદ પદ્મપ્રણમ્યવૈ ॥ ૩॥

દિગમ્બર-
કેવલંસ્વેષ્ટદેવસ્યસ્મરણેવર્ત્તતેસદા ।
દિશોમ્બરાણિયસ્યસ્યાત્સમ્મતસ્સદિગમ્બરઃ ॥ ૪॥

નિર્વાણા -
વાનંવિષયરૂપંયચ્છુષ્કં ફલમુદાહૃતમ્ ।
યસ્માત્તુ નિર્ગતં વાનં સનિર્વાણસ્સમીરિતઃ ॥ ૫॥

નિર્મોહી -
સ્વસ્યહાનુવર્તિષુ પુત્રવિત્તગૃહાદિષુ ।
મોહોહિનિર્ગતો યસ્માત્સ નિર્મોહૌદાહૃતઃ ॥ ૬॥

ખાકી -
ખમ્બ્રહ્મણ્યાસ્મરણચકં સુખેચપ્રકીર્તિતમ્ ।
બ્રહ્મણસ્સ્મરણેયસ્યસુખં ખાકીમતોબુધૈઃ ॥ ૭॥

નિરાલમ્બ-
દેવાન્તરેષ્વવલમ્બાયેશ્ચાલ્પસુખસાધનઃ ।
સનિશ્શેષગતો યસ્માન્નિરાલમ્બોમતોહિસઃ ॥ ૮॥

સન્તોષી -

સ્વારબ્ધસ્યતુ સંયોગાત્સ્વલ્પેલબ્ધેઽપિ વસ્તુનિ ।
સન્તોષોવિદ્યતેયસ્ય સસન્તોષી સદામતઃ ॥ ૯॥

મહાનિર્વાણ-
નિર્વાણં નિવૃત્તૌનાશે મોક્ષેચૈવપ્રકીત્તિતમ્ ।
મહન્મોક્ષસુખંયસ્ય સમહાનિર્વાણોમતઃ ॥ ૧૦॥

અખાડે મેં શામિલ હોને વાલે કી સંજ્ઞાયેં-
છોરોબનગિરેર્દારો હોઽદઙ્ઘસ્તૃતીયકઃ ।
મુદાઠયશ્ચનાગોવૈ ષષ્ઠોઽતીતોમતોબુધૈઃ ॥ ૧૧॥

પ્રત્યખણ્ડં ચ ષટ્સંજ્ઞાવિદ્યન્તેદ્યુત્તરોતરાઃ ।
તત્તત્સેવાવિભાગેન કૃતાઃ પૂર્વૈર્મુન્દાવહાઃ ॥ ૧૨॥

તથાત્ર્યબ્દાન્તન્ત્ર્યબ્દાન્તમેકૈકાતુપ્રવર્ત્તતે ।
પઞ્ચમીરવિવર્ષાન્તા મતાશ્રીસુજનૈસ્સદા ॥ ૧૩॥

અન્તિમાયાસ્તુસંજ્ઞાયા મરણાવધિર્મતોબુધૈઃ ।
અસ્યામ્ભજનનિષ્ઠાચ હિતાદિશશ્ચવર્ત્તતે ॥ ૧૪॥

છોરા -
સ્વપૂર્વેષાન્તુસેવાયૈ દન્તકાષ્ઠાદિકં તથા ।
છુરતિતેન છોરેતિ સંજ્ઞાતસ્યપ્રકીર્તિતા ॥ ૧૫॥

બનગીદાર-
સબનગિરિદારોવૈરાગ્યેવવનઞ્ચયઃ ।
દૃણાતિપ્રભુકૈર્ડ્યૈઃ કલ્મષસ્યગિરિન્તથા ॥ ૧૬॥

હુઽદઙ્ઘા-
અન્નાપાકાદિકૈર્ડ્યૈર્દુર્જનાનામનાદરાત્ ।
પાલયત્યાત્માનંયસ્તુ હોઽદઙ્ઘોમતો બુધૈઃ ॥ ૧૭॥

મુદાઠિયા-
મુદમાપ્નોતિસર્વત્રયતોદેવસ્તતોમુદાઠૂ ।
સેવાર્થમયતેતં યો મુદાઠયમતોહિસઃ ॥ ૧૮॥

નાગા -
નગવદુપકારેયોવર્ત્તતે મહતાં સદા ।
સમ્યગ્વચન ચાતુર્યૈસ્તેનનાગાઉદાહૃતઃ ॥ ૧૯॥

અતીત-
પઞ્ચસંજ્ઞોક્તકૈર્દ્ધર્મમતિક્રમ્યસ્થિતસ્તુયઃ ।
કેવલંરામસ્મરણેયત્તોઽતીતો મતો બુધૈઃ ॥ ૨૦॥

અખાડમલ્લ-
ગુરુસ્થાનમ્મયા સેવ્યમિત્યભિમાનંસન્ત્યજન્ ।
અખણ્ડધરતેયશ્ચાખણ્ડમલ્લમતોહિસઃ ॥ ૨૧॥

સ્થાનધારી-
ગુરુસ્થાનમ્મયાસેવ્યમિતિધર્મન્તુહ્યત્યજન્ ।
ગુરુકૃપાવલમ્બીયઃ સહિસ્થાન ધરોમતઃ ॥ ૨૨॥

મહાનિર્વાણ સન્તોષૌ નિર્મોહસ્યાનુયાયિનૌ ।
નિરાલમ્બશ્ચખાકીચ નિર્વાણસ્યાનુયાયિનૌ ॥ ૨૩॥

દિગમ્બરશ્ચમધ્યસ્થોગમને વર્ત્તતે સદા ।
નિર્વાણશ્ચાગ્રતોગચ્છેન્નિર્મોહસ્તુપ્રષ્ઠતઃ ॥ ૨૪॥

ત્ર્યનીકમેવંસમ્બન્ધં સર્વવૈષ્ણવસમ્મતમ્ ।
વર્ણિતઞ્ચમયાતત્તુ પૂર્વેભ્યશ્ચયથાશ્રુતમ્ ॥ ૨૫॥

રામનારાયણેનાયં સુજ્ઞાનાયસતાંસદા ।
અખણ્ડસંજ્ઞાસિદ્ધાન્તો વર્ણિતોવૈમુદાવહઃ ॥ ૨૬॥

ઇતિ દ્વિપઞ્ચાશદ્દ્વારાચાર્યાકૃતા ભજનરત્નાવલી સમ્પૂર્ણા ।

Encoded and proofread by Mrityunjay Pandey

*Bhajana Ratnavali*

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*